श्री ललिता अष्टकारिका स्तोत्रं

श्री ललिता अष्टकारिका स्तोत्रं

विश्वरूपिणि सर्वात्मे विश्वभूतैकनायकि |
ललिता परमेशानि संविद्ब्रह्मेः समुद्भव || 1 ||

आनंदरूपिणि परे जगदानंददायिनि |
ललिता परमेशानि संविद्ब्रह्मेः समुद्भव || 2 ||

ज्ञातृज्ञानज्ञेयरूपे महाज्ञानप्रकाशिनि |
ललिता परमेशानि संविद्ब्रह्मेः समुद्भव || 3 ||

लोकसंहाररसिके काळिके भद्रकाळिके |
ललिता परमेशानि संविद्ब्रह्मेः समुद्भव || 4 ||

लोकसंत्राणरसिके मंगळे सर्वमंगळे |
ललिता परमेशानि संविद्ब्रह्मेः समुद्भव || 5 ||

विश्वसृष्टिपराधीने विश्वनाथे विशंकटे |
ललिता परमेशानि संविद्ब्रह्मेः समुद्भव || 6 ||

संविद्बह्नि हुताशेष सृष्टिसंपादिताकृते |
ललिता परमेशानि संविद्ब्रह्मेः समुद्भव || 7 ||

भंडाद्यैस्तारकाद्यैश्च पीडितानां सतां मुदे |
ललिता परमेशानि संविद्ब्रह्मेः समुद्भव || 8 ||

इति श्री ललिता अष्टकारिका स्तोत्रं |